श्रीमद्योगीश्वरमहर्षियाज्ञवल्क्यप्रणीता

# याज्ञवल्क्यस्मृतिः

नारायण राम आचार्य 'काव्यतीर्थ'

राष्ट्रिय संस्कृत संस्थान
नई दिल्ली

पुस्तकमिदं राष्ट्रियसंस्कृतसंस्थानस्य पुनर्मुद्रणयोजनायां प्रकाशितम्।

# YĀJNAVALKYASMṚTI

OF

## YOGĪŚVARA YĀJNAVALKYA

EDITED WITH NOTES ETC.

BY

NARAYANA RAM ACHARYA
KAVYATIRTHA

RASHTRIYA SANSKRIT SANSTHAN
(DEEMED UNIVERSITY)
56-57, Institutional Area, Janakpuri, New Delhi-110 058

# याज्ञवल्क्यस्मृतिस्थविषयाणामनुक्रमणिका ।

## आचाराध्यायः १


| विषयाः | पृष्ठं |
|---|---|
| **उपोद्घातप्रकरणम् १** | |
| टीकाकारस्य मङ्गलाचरणम् ... | १ |
| मुनीनां प्रश्नः ... ... | १ |
| षड्विधस्मार्तधर्मः ... | २ |
| धर्मस्य चतुर्दश स्थानानि ... | २ |
| धर्मशास्त्रप्रयोजका ऋषयः ... | ३ |
| धर्मस्य कारकहेतवः ... | ३ |
| धर्मस्य ज्ञापकहेतवः ... | ४ |
| देशादिकारकहेतूनामपवादः... | ४ |
| कारकहेतुषु ज्ञापकहेतुषु वा संदेहे निर्णयः ... ... | ४ |
| **ब्रह्मचारिप्रकरणम् २** | |
| वर्णाः ... ... | ५ |
| गर्भाधानादिसंस्काराः ... | ५ |
| संस्कारकरणे फलम् ... | ६ |
| स्त्रीसंस्कारेषु विशेषः ... | ६ |
| ब्राह्मणादीमुपनयनकालः ... | ६ |
| गुरुधर्माः ... ... | ६ |
| शौचाचाराः ... ... | ७ |
| प्राजापत्यादितीर्थानि ... | ७ |
| आचमनविधिः ... ... | ८ |
| प्राणायामविचारः ... | ८ |
| सावित्रीजपप्रकारः ... | ८ |
| अग्निकार्यम् ... ... | ९ |
| अभिवादनम् ... ... | ९ |
| अध्याप्याः ... ... | ९ |
| दण्डादिधारणम् ... ... | १० |
| भैक्षचर्याप्रकारः ... ... | १० |
| भोजनादिप्रकारः... ... | १० |
| ब्रह्मचारिणो वर्ज्यानि ... | ११ |
| गुर्वाचार्यादिलक्षणम् ... | ११ |
| उपाध्यायर्त्विग्लक्षणम् ... | ११ |
| ब्रह्मचर्यावधिः ... ... | ११ |
| उपनयनकालस्य परमावधिः... | १२ |
| द्विजत्वहेतुकथनम् ... | १२ |
| वेदग्रहणाध्ययनफलम् ... | १२ |
| काम्यब्रह्मयज्ञाध्ययनफलम् ... | १३ |
| पञ्चमहायज्ञफलम् ... | १३ |
| नैष्ठिकब्रह्मचारिधर्माः ... | १४ |
| **विवाहप्रकरणम् ३** | |
| गुरुदक्षिणादानपूर्वं स्नानम् ... | १४ |
| कन्यालक्षणानि ... ... | १५ |
| कन्याया बाह्यलक्षणानि ... | १६ |
| कन्याया आभ्यन्तरलक्षणानि | १६ |
| सापिण्ड्यविचारः ... | १७ |
| कन्यावरणे नियमः ... | १८ |
| कन्यादाने वरनियमः ... | १८ |
| द्विजातीनां शूद्रापरिणयन-निषेधः ... ... | १८ |
| वर्णक्रमेण द्विजातीनां भार्याकरणेऽधिकारः ... | १९ |
| ब्राह्मविवाहलक्षणम् ... | १९ |
| दैवार्षविवाहयोर्लक्षणम् ... | १९ |
| प्राजापत्यविवाहलक्षणम् ... | १९ |
| आसुरगान्धर्वादिविवाह-लक्षणानि ... ... | २० |
| सवर्णादिपरिणयने विशेषः ... | २० |
| कन्यादूषणः ... ... | २० |
| कन्याहरणे दण्डः ... | २० |
| कन्याया दोषमनाख्याय दाने | २० |
| अन्यपूर्वालक्षणम्... ... | २१ |
| देवरादिनियोगविधिः ... | २१ |

**संधिन्यनिर्दशावत्सागोपयः परिवर्जयेत् ।
औष्ट्रमैकशफं स्त्रैणमारण्यकमथाविकम् ॥ १७० ॥**

गौः या वृषेण संधीयते सा **संधिनी** । 'वशां वन्ध्यां विजानीयाद्वृषाक्रान्तां च संधिनीम्' इति त्रिकाण्डीस्मरणात् । या चैकां वेलामतिक्रम्य दुह्यते, या च वत्सान्तरेण संधीयते सा संधिनी । प्रसूता सत्यनतिक्रान्तदशाहा **अनिर्दशा**, मृतवत्सा **अवत्सा**, संधिनी च अनिर्दशा च अवत्सा च संधिन्यनिर्दशावत्सा-स्ताश्च **गावश्च** तासां **पयः** क्षीरं **परिवर्जयेत्** । 'संधिनी'ग्रहणं संधिनीयमल-सुवोरुपलक्षणार्थम् । यथाह गौतमः ( १७।२५ )—'स्यन्दिनीयमसूसंधिनीनां च' इति । स्रवत्पयःस्तनी स्यन्दिनी, यमलसूर्यमलप्रसविनी, एवमजामहिष्योश्चा-निर्दशयोः पयो वर्जयेत्; 'गोमहिष्यजानामनिर्दशानाम्' ( १४।३५ ) इति वसिष्ठ-स्मरणात् । पयोग्रहणात्तद्विकाराणामपि दध्यादीनां निषेधः । नहि मांसनिषेधे तद्विकाराणामनिषेधो युक्तः । विकारनिषेधे तु प्रकृतेरनिषेधो युक्तः । पयोनिषे-धाच्छकृन्मूत्रादेरनिषेधः । उष्ट्राजातमौष्ट्रं पयोमूत्रादि । एकशफा वडवादयः, तत्प्रभवं **ऐकशफम्** । स्त्रीभवं **स्त्रैणम्** । 'स्त्री'ग्रहणमजाव्यतिरिक्तसकलद्विस्तनी-नामुपलक्षणार्थम् ।—'सर्वासां द्विस्तनीनां क्षीरमभोज्यमजावर्ज्यम्' इति शङ्ख-स्मरणात् । अरण्ये भवा आरण्यकास्तदीय**मारण्यकं** क्षीरं माहिषव्यतिरेकेण । 'आरण्यानां च सर्वेषां मृगाणां माहिषं विना' ( मनु. ५।९ ) इति वचनात् । अवेर्जात**माविकम्** । 'वर्जयेत्' इति प्रत्येकमभिसंबध्यते । औष्ट्रमित्यादिविकार-प्रत्ययनिर्देशात्तद्विकारमात्रस्य पयोमूत्रादेः सर्वदा निषेधः; 'नित्यमाविकमपेयमौष्ट्र-मैकशफं च' ( १७।२४ ) इति गौतमस्मरणात् ॥ १७० ॥

**देवतार्थं हविः शिग्रुं लोहितान्व्रश्चनांस्तथा ।
अनुपाकृतमांसानि विड्जानि कवकानि च ॥ १७१ ॥**

**देवतार्थं** बल्युपहारनिमित्तं साधितम् । **हविः** हवनार्थं सिद्धं प्राक् होमात् । **शिग्रुः** सोभाञ्जनः, **लोहितान्** वृक्षनिर्यासान् । **व्रश्चन**प्रभवान् वृक्षच्छेदन-जातानलोहितानपि । यथाह मनुः—( ५।६ ) । 'लोहितान्वृक्षनिर्यासान्व्रश्चन-प्रभवांस्तथा' इति । 'लोहित'ग्रहणात् हिङ्गुकर्पूरादीनामनिषेधः । **अनुपाकृत-मांसानि** यज्ञेऽहुतस्य पशोर्मांसानि, **विड्जानि** मनुष्यादिजग्धबीजपुरी-षोत्पन्नानि तन्दुलीयकप्रभृतीनि च, **कवकानि** छत्राकाणि, 'वर्जयेत्' इति प्रत्येकमभिसंबध्यते ॥ १७१ ॥

**टिप्प०**—1 अत एवाह हारीतः—'सन्धिनी वृषस्यन्ती तस्याः पयो न पिबेद्दतु मद्भवतीति । या गर्भिणी सति दुग्धे सा संधिनीति—**हरदत्तः** । 2 मृतवत्सात्वादित्या-शयः । 3 तदग्रे तु श्रुतिविहितमेवेति तत्त्वम् ।

**पाठा०**—१ रनिषेधो युक्तः ख. २ व्यतिरिक्तम् क. ३ शोभाञ्जनः क. ४ पुरीषस्थाने उत्पन्नानि क.